# श्रीमद्भागवते काव्यतत्त्वविमर्शः

## सारांशिका

संस्कृतभाषा सर्वविधदोषशून्यत्वादियं भाषा देवभाषा, देववाणी, सुरभारती, गीर्वाणवाणी इत्यादिकैः नामभिः प्रसिद्धमुपगतास्ति लोके । अतः अन्या भाषा प्राकृतभाषापदवीं प्राप्ता । संस्कृतभाषा संसारे प्रचलितासु सर्वासु भाषासु प्राचीनतमा, परिष्कृततमा च विद्यते । भाषैषा किमर्थमभिधीयते देववाणीति । देवैः व्यवह्रियमाणत्वात् संस्कृतं देववाणी इत्युच्यते इति धारणा वर्तते । सर्वे देवाः संस्कृतेनैव संलपन्ति । तस्मादेव व्यवहारप्रयुक्ता एषा देववाणीति नाम्ना ख्याता भुवि । संस्कृतभाषायामेव विश्वसाहित्यस्य सर्वप्रचीनग्रन्थाः चत्वारो वेदाः अन्याः ग्रन्थाश्च सन्ति, येषां महत्त्वमद्यापि सर्वोपरि वर्तते ।

संस्कृतवाङ्मये पुराणानामेकं विशिष्टं स्थानमस्ति तथा तेषां महन्महत्त्वमपि विद्यते, सर्वसाधारणजनेषु सभ्यता–संस्कृत्योः प्रचारः प्रसारश्च पुराणानां प्रधानं कार्यमस्ति । पाश्चात्या इतिहासवेत्तारोऽपि पुराणानि भारतीयानां सांस्कृतिकनिधिः मन्यते ।

संस्कृतवाङ्मये नैकानि पुराणानि तत्रापि महापुराणानां वैशिष्ट्यं सर्वत्र दरीदृश्यते । पुराणेष्वपि श्रीमद्भागवतस्य महत्त्वं, वैशिष्ट्यं लोकोपकारिकत्वञ्च जगति प्रसिद्धमिति ।

**श्रीमद्भागवतशब्दस्य व्युत्पत्तिः**

श्रीमद्भागवतं हि धार्मिकाध्यात्मिकवाङ्मये एकं समुज्ज्वलं ग्रन्थरत्नमस्ति । भारतीयानामास्तिकजनानां न केवलं हृदयेषु, न केवलं सर्वश्रेष्ठपुराणरूपेण, प्रत्युत श्रीभगवद्विग्रहरूपेणास्मिनास्था विद्यते ।

श्रीमद्शब्दस्य प्रयोग अस्मिन्नेव पुराणे दृश्यते । श्रीमद्शब्दस्य व्याख्या सम्यक्तया भावार्थदीपिकायां वंशीधरमहाभागैः प्रतिपादिता – **श्रीमद्भागवते ऋचः सामानि यजूंषि सा हि श्रीरमृता सताम्" इति श्रुतेर्वेदाभ्यास एव श्रीः सा विद्यते सा विद्यतेऽस्यास्मिन्वेति श्रीमान्"** अत एव श्रीमद्शब्दस्य प्रयोग अस्मिन्नेव पुराणे दृश्यते । भागवतशब्दस्य प्रयोगः संज्ञा विशेषणश्च अर्थद्वयं प्रयुक्तं जातम् श्रीमद्भागवते । यथा – **भगवता प्रोक्तम्**[1] । **भगवतोदितम्**[2] । यतोहि श्रीमद्भागवतमाहात्म्ये व्यासेनोक्तम् –

**तेनेयं वाङ्मयीमूर्तिः प्रत्यक्षा वर्तते हरिः ।**[3]

अपि च – **साक्षात् भगवता प्रोक्तं इति भागवतम् । इति निरुक्त्या योगरूढोऽयं शब्दः न तु यौगिकः** । इति दीपिनीव्याख्यायां श्रीराधारमणगोस्वामिनोक्तम् । द्वितीयकारणमस्ति यत्र षड्विधमैश्वर्यं यत्र विद्यते स एव श्रीकृष्णः । अपि च यस्मिन् श्रीकृष्णोपासना वर्णिता तदेव भागवतम् । कारणादण्, श्रीमांश्सचासौ भागवतस्य चेति श्रीमद्भागतस्य तस्मिंस्तथा श्रीमद्भागवतम् । एतादृशी व्याख्या विविधटीकोपेतं श्रीमद्भागवतं महापुराणनामके पुस्तके प्राप्यते । श्रीमद्भागवते सर्वा विद्याः संनिहिताः सन्ति । तेन कारणेन **विद्यावतां भागवते परीक्षेति** प्रसिद्धिः भूता ।

श्रीमद्भागवते धर्मार्थकाममोक्षसम्बन्धीनि तत्त्वानि संनिहितानि सन्ति । यथा सर्वेषां शास्त्राणां तत्त्वान्यत्र तथैव काव्यतत्त्वमप्यत्र निगूढमिति । अत एव श्रीमद्भागवते काव्यतत्त्वविमर्शः

तत्र वेदवेदाङ्गानां दर्शनानां विविधशास्त्राणां काव्यशास्त्राणां विविधतत्त्वानाञ्च रहस्यं तत्त्वं चोपलभ्यते । यतोहि श्रीमद्भागवते विविधानि

1 श्रीमद्भागवतमहापुराणम् २/९/४३
2 श्रीमद्भागवतमहापुराणम् २/७/५१
3 श्रीमद्भागवतमहापुराणस्य माहात्म्ये ४/६२

काव्यतत्त्वान्यपि समुपलब्धानि सन्ति । इति मनसि सञ्चिन्त्यैव मया **"श्रीमद्भागवते काव्यतत्त्वविमर्शः"** इति विषयमवलम्ब्य शोधकार्यं प्रारब्धं कृतम् । शोधविषयोऽयं पञ्चस्वध्यायेषु विभक्तः कृतः मया । तद्यथा –

प्रथमेहि भूमिका विद्यते तत्र श्रीमद्भागवतस्य महत्त्वमित्यादिकं वर्तते ।

**प्रथमोऽध्यायः – अयमध्यायः पुराणविमर्शात्मको वर्तते ।**

अस्मिन्नध्याये त्रय अंशा वर्तन्ते । ते च निम्नलिखिताः –

पुराणवाङ्मयस्य वैशिष्ट्यम् ।

महापुराणेषु भागवतम् ।

श्रीमद्भागवतस्य वर्ण्यविषयाः ।

**पुराणवाङ्मयस्य वैशिष्ट्यम् –** अत्र संस्कृतभाषायाः महत्त्वं पुराणशब्दस्य व्युत्पत्तिरर्थरर्थश्च तथा इतिहासशब्दस्यव्युत्पतिः पुराणानां प्राचीनत्वं वेदपुराणयोः सम्बन्धः पुराणानां भाषाशैली कथनकञ्च सम्यक्तया प्रतिपादितम् । तद्रहस्यं वैशिष्ट्यं महत्त्वञ्च वर्णितम् ।

**महापुराणेषु भागवतम् –** अत्र महापुराणस्य परिभाषा महापुराणेषु श्रीमद्भगवतस्य महापुराणत्वमण्डनम् अत्र निरूपितम् ।

**श्रीमद्भगवतस्य वर्ण्यविषयाः –** प्रथमेहि श्रीमद्भागवतमहापुराणस्य परिचयः प्रदत्तः । श्रीमद्भागवतस्य लक्षणदृष्ट्यावैशिष्ट्यं महत्त्वञ्च प्रतिपादितम् । श्रीमद्भागवतस्य प्रथमस्कन्धतः द्वादशस्कन्धपर्यन्तं ये ये विषयाः तत्र समुपलब्धाः भवन्ति, तेषां विषयाणां वर्णनं साङ्केतिकरूपेण निर्दिष्टमत्र ।

**द्वितीयोऽध्यायः –भागवतविमर्शात्मको वर्तते ।** अत्रापि अंशत्रयमस्ति ।

श्रीमद्भागवतस्य शास्त्रीयं वैशिष्ट्यम् ।

श्रीमद्भागवते आध्यात्मिकनिदर्शनम् ।

श्रीमद्भागवतस्य तात्विकरहस्यम् ।

**श्रीमद्भागवतस्य शास्त्रीयं वैशिष्ट्यम् –** श्रीमद्भागवते विविधशास्त्राणां सन्दर्भाः वेदोपवेदानां षड्ङ्गानां शिक्षानिरुक्तकल्पछन्दव्याकरणज्योतिषादीनि शास्त्राणि समुपलब्धानि । **श्रीमद्भागवते आध्यात्मिकनिदर्शनम्** श्रीमद्भागवते दार्शनिकं तत्त्वमपि अन्यूनमिति । अत्राध्यात्मिकदृष्ट्या निदर्शितम् ।

**श्रीमद्भागवतस्य तात्विकरहस्यम् –** श्रीमद्भगवतस्य भगवत्तत्त्वरहस्यं उपनिबद्धम् । ब्रह्ममायाजीवादीनां वर्णनमत्र प्रस्तुतं कृतमिति ।

**तृतीयोऽध्यायः – काव्यविमर्शात्मकोध्यायः** । अस्मिन्नध्याये द्वौ अंशौ वर्तेते ।

(१) काव्यतत्त्वनिरूपणम् ।

(२) काव्यतत्त्वविषये विभिन्नाचार्याणां मतम् ।

**काव्यतत्त्वनिरूपणम् –** काव्यस्य व्युत्पत्तिः, उद्भवो विकासश्च इत्यादीनां वर्णनं कृतम् । संस्कृतसाहित्ये काव्यशास्त्रं, काव्यशास्त्रस्य कालविभाजनं काव्यतत्त्वानां साङ्गोपाङ्गवर्णनं काव्यस्य विभिन्नाचार्याणां मते काव्यलक्षणं काव्यप्रयोजनं काव्यस्य हेतु इत्यादिकं वर्णनं कृतम् ।

**काव्यतत्त्वविषये विभिन्नाचार्याणां मतम्** – काव्यतत्त्वविषये ये सम्प्रदायाः प्रवर्तितन्तः तेषां सम्प्रदायानां रसतः औचित्यपर्यन्तं समेषां वर्णमत्र प्रस्तुतम् कृतम।

**चतुर्थोऽध्यायः–काव्यतत्त्वविमर्शात्मकोऽध्यायः ।** अस्मिन्नध्याये भागद्वयं वर्तते ।

श्रीमद्भागवते काव्यतत्त्वम् ।

काव्यतत्त्वानां वैशिष्ट्यं तदुपयोगिता च ।

**श्रीमद्भागवते काव्यतत्त्वम् –** अत्र काव्यशास्त्रस्य षड्सम्प्रदायानुसारि वर्णनं निबद्धम् । यथा श्रीमद्भागवते शब्दार्थविषयकवर्णनम्, रसविषयकवर्णनं, अलङ्कारविषयकवर्णनं, छन्दविषयकवर्णनं गुणविषयकवर्णनं,, दोषविषयकवर्णनम् अस्य ग्रन्थस्य भाषाशैली कथानकञ्च प्रतिपादितम ।

**काव्यतत्त्वानां वैशिष्ट्यं तदुपयोगिता च –** अस्मिन् प्रकरणे काव्यतत्त्वानां वैशिष्ट्यमुपयोगिता च सम्यक्तया प्रतिपादिता ।

**पञ्चमोऽध्यायः – काव्यसमीक्षात्मकोऽध्यायः–**अस्मिन्नध्याये भागद्वयं वर्तते ।

श्रीमद्भागवते काव्यतत्त्वानां विश्लेषणम् ।

श्रीमद्भागवते काव्यतत्त्वानां समीक्षणम् ।

**श्रीमद्भागवते काव्यतत्त्वानां विश्लेषणम् –** अस्मिन् प्रकरणे श्रीमद्भागवतमहापुराणस्थरसछन्दादिकाव्यतत्त्वानां विश्लेषणं कृतम् ।

**श्रीमद्भागवते काव्यतत्त्वानां समीक्षणम् ।–** अत्र श्रीमद्भागवते प्राप्तकाव्यतत्त्वानां समीक्षाविषये चर्चा विहिता ।

अन्ते उपसंहारः सहायकग्रन्थानां सूची च वर्तते । अत्र प्रतिपादितस्य सम्पूर्णशोधप्रबन्धस्य सारतत्त्वं मयोपस्थापितम् ।

------------